National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(59): 223-228
© 2025 NJHSR
www.sanskritarticle.com

**डॉ. पूनम कुमारी**
पूर्व सहायक संस्कृत प्रवक्ता,
दयानन्द महाविद्यालय, हिसार।

**Correspondence:**
**डॉ. पूनम कुमारी**
पूर्व सहायक संस्कृत प्रवक्ता,
दयानन्द महाविद्यालय, हिसार।

# भारतीय जीवन शैली - वैश्विक आकर्षण का केन्द्र

**डॉ. पूनम कुमारी**

**भारतीय - जीवनशैली भारतीय - संस्कृते एव समाहिता**
**सम्+कृ+क्तिन प्रत्यय संयोगेन संस्कृति शब्दः**
निष्पद्यते। अन्तः करणस्य संस्कारों यथा क्रियते सा संस्कृतिः इति कथ्यते। यद्यपि संस्कृतिः इति शब्दः विविधार्थे प्रयुज्यते। यस्य यादृशः संस्कारः तादृशी तस्य संस्कृति भवति। कस्यापि देशस्य आचारः, विचारः, व्यवहारः, उत्सवः, जीवन-प्रणाली, धर्मव्यवस्था इत्यादयः यादृशाः भवन्ति तस्य देशस्य सा एव संस्कृति भवति। भारतीय संस्कृति प्राचीनकालात् अवरतरूपेण विद्यमाना अस्ति। यूनान, मिश्र, रोमादि देशानां संस्कृतयः यद्यपि विनष्टाः परम् अस्माकम् संस्कृति अद्यापि जीविता अस्ति।

भारतदेशे विविधा धर्मावलम्बिनः, विविधा जातयः विविधा भाषाश्च सन्ति परं भारतीय संस्कृतिः एकरूपा एव ज्ञायते। यद्यपि विदेशी शासकानां प्रभावः भारतीय - मानवेषु परिज्ञायते परं भारतीया-संस्कृति अपरिवर्तशीला एव। वस्तुतः भारतीय संस्कृति विषय वासनां प्रति विरागतां, आचाराणां पवित्रतां, विचाराणां पावनतां करोति। धार्मिक विचारः, सुखा-शान्ति प्रचारः, शुभाकांक्षा, जीवानां प्रति दया इत्यादयः भारतीय संस्कृते मूलमंत्राः सन्ति। यथा च कथितम् -

**" सर्वे भवन्तु सुखिनः, सर्वे सनतु निरामया।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःख भाग्भवत्।**

**अस्माकम् संस्कृते आदर्शभूता सिद्वान्ता सन्ति -**

सत्यस्य परिपालनम्, अंहिसामय आचरणम्, अतिथि -
सेवा, माता - पिता गुरू भक्ति, त्यागपूर्वक-भोगाः,
धार्मिक-विचाराः, दीनान् प्रति दया। भारतीय संस्कृतौ

आध्यात्मिक, धार्मिक, दार्शनिक भावना प्रबलरूपेण दृश्यते। हिंसाया बहिष्कारों विद्यते, जीवनं प्रति आत्मीयता अवलोक्यते। वयं सर्वे एकस्य परमेश्वरस्य अंशरूपाः स्मः। यथा - नद्यः समुद्रं गत्वा एकरूपा भवन्ति तथैव तथामपि। अतएव कथितम् -

**"आत्मन् प्रतिकूलानि परेषां न समाचरेत्।"**
**भारतीय संस्कृते विधानमस्ति**
**"परहित सरिस धर्म नहीं भाई,**
**पर पीड़ा सम नहि अधमाई।।"**
अर्थात् दूसरों के हित जैसा कोई धर्म नहीं
और दूसरों को पीड़ा देने जैसा कोई नीच कार्य नहीं।।

भारतीय संस्कृते विशेष अस्ति यत् सांसारिक वस्तुणां उपरि कस्यापि विशेष मानवस्य अधिकारः नास्ति अपितु सर्वेषां मनुष्याणां समानरूपेण अधिकारः अस्ति। अस्माकम् वेदः कथ्यति –

**"ये समानाः समनसो जीवा जीवेषु मामकाः।**
**येषां श्रीर्मयि कल्पताम् अस्मिन्न लोके शतं समाः।।"**

अर्थात् - समस्त जीवों में जो मन से साम्यभाव वाले हैं वही मुझको प्रिय है और उन्हीं की संपत्ति सैकड़ों वर्ष तक रहती है।

**भारतीया संस्कृते पर्वाणाम् विशेष महत्त्वमस्ति।**
**दीपावली, होली, दुर्गापूजा, रामलीला, दशहरा,**
**सूरजकुण्ड शिल्प महोत्सवः इत्यादिनां पराकाष्ठा सन्ति।**
**भारतवर्षस्य लक्ष्यम् सर्वदा त्यागः एव अस्ति।**
**"सत्यहिंसा गुणैः श्रेष्ठा, विश्वबन्धुत्वशिक्षिका**
**विश्वशान्तिसुखाछात्री भारतीया हि संस्कृतिः।"**
**अस्माकम् भारतीय जीवन-शैली श्रेष्ठा अस्ति।**
**या व्यपनयति मलं मनसः, चा´चल्यं चेतसः,**
**अज्ञानावरणमात्मनश्च । भारतीय संस्कृति र्हि जीवनस्य अन्तरङ्ड. स्वरूपं प्रकाशयति। भारतीय जीवनशैल्याम् मननम्, चिन्तनम्, दार्शनिकम् विश्लेषणम्, कर्त्तव्याकर्त्तव्यस्य विवेचनम्, जीवनोत्कर्षाधाय तत्त्वानां गवेषणम्- सर्वमेतत् संस्कृति शब्देन संगृहृते।**

**1.भारतीय संस्कृतेर्महत्त्वम् -**

भारतीय संस्कृततिरेवैषा चेतः प्रसादयति, मनोअमलीकुरूते, दुर्भावान् दमयते, दुर्गुणान् दारयति, पापान्यपाकुरूते, दुःखद्वन्द्वानि दहति, ज्ञानज्योतिर्ज्वलयति, अविद्या तमोपहन्ति, भूतिं समादधाति च। प्रत्येक राष्ट्रस्य पृथक्-पृथक् संस्कृति (जीवन शैली) भवति। भारतीय संस्कृति न केवलं सर्वेषु प्राचीना अपितु सर्वेषु श्रेष्ठाश्च अस्ति। यतः अस्मिन् आध्यात्मिकताया गुणःविद्यमानः अस्ति। भारतीय संस्कृति त्याग भावनायाम् आधारितः अस्ति।
यः स्याद् धारण् संयुक्तः स धर्म इति निश्चयः।" भारतीय संस्कृते गुण-कर्मस्य च प्रधानता विद्यमानः अस्ति। गुण कर्म स्वभावेनैव कस्यापि मनुष्यस्य लघुता गुरूताश्च मापनं भवति। सर्वत्र कर्मस्य प्रधानता अस्ति।

**"एकवर्ण मिदं पूर्व विश्वमासीत् युधिष्ठिर।**
**कर्मक्रिया विशेषेण चतुर्वर्णं प्रतिष्ठितम्।"** (भागवत)

**3.विवाह - संस्कार :-**

हिन्दू संस्कृते विवाहः धर्मस्य एकः अंगः अस्ति। सुव्यवस्थित सामाजिक जीवनायकृते सृष्टि विस्तारस्य कृते अस्य महत्वमस्ति। अर्थात् गृहस्य आश्रमः यस्य उपरि सर्वे आश्रमाः आश्रिता भवन्ति। अनेन पुनीत् संस्कारेण पितृ ऋणात् मुक्ति भवति, वंश रक्षायाअपि विधानमस्ति। पत्नी सर्वदा पतिव्रताधर्मस्य पालनं करेति स्वपरिवारं सुष्ठुरूपेण चलनाय सा स्वान्तर्निहित भावानां प्रस्तौति। कथ्यतेऽपि

**"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता"**

**4.भारतीय शिष्टाचार -**

**गुरूजनानाम् प्रतिश्रद्वा अस्माकम् संस्कृते मूलाधारः अस्ति।**
**"अभिवादनशीलस्य नित्यं वृद्धोपसेविनः,**
**चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम्।"**
**"आचारः परमो धर्मः' इति सिद्धान्तमाश्रित्य सदाचारः**

सर्वोतमं तप इति स पालनीयः। सदाचार पालने ब्रह्चर्यस्य विशिष्टं महत्त्वम्। ब्रह्चर्यव्रतस्याश्रयणेन न केवलं शारीरिकी समुन्नतिरवाप्यते अपितु मानसिकी, बौद्विकी, आध्यात्मिकी चापि उन्नति भवति। देवा ब्रह्चर्यव्रतपालनेनैव मृत्युमपि वशीकृतवन्तः।

**"ब्रह्चर्येण तपसा देवा मृत्युमुपाध्नत"** (अथर्ववेद)

मातृपितृगुरूभक्तिः अस्माकम् संस्कृते समाहिता।

मातृदेवो भव, पितृदेवो भव, आचार्य देवो भव इत्येतेषां देववत् पूज्यत्वमाख्यायते। मातु पितृ गुरूणां च आदेशोनवरत पालनीयः। ते एव मानवस्य सर्वोतमं शुभचिन्तकाः। तेषामाज्ञानुसारमेव व्यवहर्त-व्यम्। गुरूको साक्षात् परब्रह्न माना जाता है।

**"गुरूर्ब्रह्न गुरूर्विष्णु गुरूर्देवोमहेश्वरः**
**गुरू साक्षात् परब्रह्नः तस्मै श्री गुरवे नमः।"**
**अतिथि देवो भवः इति भावना अपि अत्रैव शोभ्यते।**

**5.मूर्ति- पूजा -**

चित्त एकाग्रस्य अमूल्य साधनं मूर्तिपूजा अस्ति। भारतीय संस्कृते प्रतीकवादस्य महत्त्वपूर्णम स्थानमस्ति। सर्वेषां कृते पूजा-पद्वतेः आविष्कारः भारतेनैव कृता। हिन्दू धर्मे एतादृशानि मूलभूतसिद्धान्तानि दृष्टि - गोचरा भवन्ति येषु हिन्दुनां (भारतीयानाम्) कुशाग्र बुद्विः, विवेकः, मनोविज्ञानस्य अपूर्व ज्ञानम् भवति। मन्दिरेषु देवप्रतिमा स्थापित्वा यत् यः अस्माकम् कार्याणां दृष्टा इति मत्वा सदाचारणम् कुर्वन्ति। भजन, पूजन, स्वाध्याय प्रार्थनां कुर्वन्ति। वाण्या प्रभो गुणगानं कुर्वन्ति येषां चित्तशुद्विः भवति, राग-द्वेषः, अहंकारः इत्यादि दूर्भावानाम् विनाशः भवति। अन्तः करण शान्तः निर्मलश्च भवति। तत्र विविधदेवानामुपासना वर्ण्यते।

**भारतीय संस्कृते देवपूजायाः विधानमपि अस्ति।**
**"आरोग्यं भास्करादिच्छेत धनामिच्छेदहुताशनात्।**
**ज्ञान च शंकरादिच्छेत जनार्दनात्।।**
**अर्थात् आरोग्य की कामना सूर्यनारायण से करें।**

धन की इच्छा अग्निदेव से करें, ज्ञान के लिए शंकर जी की आराधना करें और मुक्ति के लिए जनार्दन का आश्रय ग्रहण करें।

**6.एकता -**

भारतीया संस्कृते एकताया भावना अपि सर्वोपरि। विभिन्न पाश्चात्य राष्ट्रा भारतस्य कीर्ति, पराक्रमः समृद्विपूर्णः गायानां श्रुत्वा अत्र आगता। भारतीया संस्कृतिः परस्परम् भ्रातृभावः, प्रेमभावः, सहानुभूतिः इत्यादिभिः गुणै निबध्यते। अस्माकम् राष्ट्र अधुनोपि विश्वस्य मार्गदर्शकः अस्ति। अनेकतामपि एकता अस्माकम् संस्कृते विशेषता अस्ति।

**7.महापुरूषाणाम् जननी -**

**भारतभूमि वीरपुरूषाणां जन्मदात्री।**
**वीरपुरूषान् भारतभूमिम् गौरवान्वित् अकरोत्।**
**पिता-पुत्र मध्ये सम्बन्धः कीदृशः पवित्रः भव्यश्च**
**आस्ताम् अस्या उदाहरणम्- भगवान रामचन्द्रः**
**मातुः आज्ञया चतुर्दश वर्षस्य कृते वनवासं अगच्छत्।**
**स्व नेत्रहीन माता-पितरौ तीर्थयात्राया कृते नेतुम्।**
**श्रवणकुमारः। पिता हर्षाय यमपुरी गमनकर्त्ता नचिकेता।**
**स्व पितुः हर्षाय आजीवन ब्रह्चर्यव्रत पालनकर्ता**
**भीष्मपिता महस्य चरित्रम् अश्वयमेव पठनीयमस्ति।**
**एतादृशा अनेका कथा अस्माकम् साहित्ये उपलब्धा।**
**सर्वदा शुभ कर्मणि प्रवृत्तः भारतीय।**
**"सत्यस्य वचनं श्रेयः सत्यवान तु दुष्करम्।**
**यद्भूतहित मत्यन्तम् एतत सत्यं ब्रवीम्यहम्।।"**

दूसरों की निन्दा से अपनी उन्नति को कभी न देखें। अपने सद्गुणों से ही दूसरे मनुष्यों की जो उन्नति चाहे वही सच्चा भारतीय है।

**8.सर्वत्र परमात्म दर्शनः -**

भारतीया संस्कृति प्रेमभावनां आधारिता अस्ति। सर्वदा प्रेम, सोहार्द, सहानुभूति, दया, विश्वबन्धुत्व इत्यादि भावानां प्रस्तौति।

**'शीलं हि शरणं सौम्य "** (अश्वघोष)

**अर्थात् सत् स्वभाव हि मनुष्य का रक्षक है।**
**श्रेष्ठ स्वभावेन एव श्रेष्ठ समाजस्य निर्माणं भवति।**
**कथ्यतेपि - " तीर्थानां हदयं तीर्थ शुचीनां हदयं शुचिः,**
**सर्वेषु तीर्थेषु हृदयैव परमतीर्थः अस्ति। अस्माकम्**
**अस्माकम् आत्मासु साक्षात् ईश्वरस्य निवासः अस्ति**
**अतः आत्मैव अस्माकम् उपदेशकः अस्ति।**
**"शाश्ता विष्णुरशेसस्य जगतो यो हृदि स्थितः।**
**न मृते परमात्मानं तात कः केन शास्यते।।** (विष्णु)

अर्थात्- हृदय में स्थित भगवान विष्णु ही तो सम्पूर्ण जगत के उपदेश है। उन परमात्मका को छोड़कर और कौन को कुछ सिखा सकता है।

**भारतीय संस्कृति परेषां प्रति उदारभावना निक्षेपयति।**
**"मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।**
**आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।"**

अर्थात् - दूसरों की स्त्रियों को मां के समान दूसरों के धन को मिट्टी के ठेले के समान सभी प्राणियों को जो अपने समान समझता है वह पण्डित है।

**9.विश्वबन्धुत्वस्य भावना -**

प्राचीनैर्भारतीयै ऋषिभिर्महर्षि भिश्च सततमेवोदीरितं यत् सर्व-भूत-हित साधनम्। अस्माकम् लक्ष्यम्। तत्र राष्ट्रदेशादि भेदो विपत्ति जनक एव।

यदा स्वार्थबुद्धिर्हीयते तदैव देवत्वं जागर्ति। वेदेषु यज्ञ प्रक्रियाया एतदेव महत्वं यत् स्वार्थ-परिहार-पूर्वकं परार्थ-साधनं शिक्षयते। एतदेव यज्ञप्रक्रियायां स्वाहा- (स्व-आ हा, स्वार्थस्य सर्वथा त्यागः) इदं न मम इत्यादिभिः पदैर्निर्दिश्यते। निजत्व - परत्वभावना तु अल्पधियामेवा-भिमता। परं ज्ञनिनस्तत्वदर्शिनश्च समत्व बुद्धिम आश्रित्य जगद् - हितचिन्तने सर्वलोक कल्याणे च प्रवर्तन्ते। अतएव साधूच्यते -

**"अयं निजः परोवेति गणना लघुचेतसाम्,**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।"**
**भारतीय जीवन - शैल्याम् विश्वहितस्य भावना सर्वोपरि**
**"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।**

सत्कर्म मानवस्य मानवत्वं पोषयति। परहिताश्रयणं विश्वबन्धुत्वं च मानवं देवत्वं प्रापयति।

**10.परोपकारस्य भावना**

भारतीय जीवन शैल्याम् परोपकारस्य भावनोपि दृष्टिगोचरा भवन्ति। समाजे मानवः परस्य हितसाधनार्थं यत् किंचिद् वितरति, मनसा वाचा कर्मणा वा परार्थ सम्पादयति, सर्व. तत् परोपकारो गणयते। परस्पर - सद्भावेनैव स्वार्थं विहाय परार्थसाधनेन, परदुःखनिवारणेन, सर्वजीवानुग्रहेण च भौतिकोभ्युदयः समासाद्यते। समाजस्य स्थितिरेव परोपकाराधारा।

**"यस्मिन् सर्वाणि भतान्यात्मैवामूद् विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः"**

प्रकृतिश्चेद् अवलोक्यते तर्हि सर्वत्र सततं परोपकार प्रक्रियैव संलक्ष्यते। मानवस्य शरीरावयवाणां परोपकारेणैव सफल्यम्। अस्माकम् संस्कृति परोपकार - भावनायाम् आधारिता। प्रत्येक मनुष्यः परोपकाराय एव जीवति जीवनस्य मूलः एव परोपकारः।

अतएव अस्माकम् संस्कृति महानः। स्वार्थ भावनां परित्यज्य परोपकार भावनां आप्नोति। परोपकार सन्दर्भे एकः श्लोकः -

**"श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पार्णिर्न तु कङ्कणेन।**
**विभाति कायः करूणा पराणां परोपकारेण न चन्दनेन।।"**

सत्सु परोपकारवृति नैसर्गिकी समीक्ष्यते। परोपकार भावनयैव महर्षि दधीचि र्देवानां हिताय स्वीयम् अस्थिजातं प्रादात्। महाराजः शिविः कपोतसंरक्षणार्थं स्वमासं श्येनाय प्रायच्छत्। महर्षिः दयानन्दो महात्मागान्धिश्च भारतभूमि - हितायैव स्वीयान् असून अहासिष्टाम। अतः साधूच्यते -

"परोपकाराय सतां विभूतयः।"

**11.अंहिसाया प्रभावः-**

अस्माकं जीवनशैल्याम् अहिंसाया भावना विद्यते। प्रेमभावनयैव राष्ट्रहितं विश्वहितं च सम्पादयितुं शक्यते। अतएव गीतायामपि दैवीसम्पद् वर्णने भगवता कृष्णेन तत्र अहिंसा गुणोअपि प्राधान्येन समाविश्यते।

**"अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।**
**दया भूतेष्वलोलुस्वं मार्दवं हरिचापलम्"।**
**अहिंसा एव स गुणो येन विश्वबन्धुत्वं विश्वप्रेम**
**विश्वहित साधनं च सम्भाव्यते। अहिंसैव धर्ममार्गः।**
**अहिंसायाः परिपालनार्थम् भगवान् बुद्धः, भगवान् महावीरः।,**
**महर्षि दयानन्दः, महात्मा गांधिश्च स्वजीवनं समर्पयासुः।**
**अहिंसा-प्रचारे एवैतेषां जीवन व्यतीयाय।**
**अहिंसाशस्त्रैणैव महात्मा गांधः पराधीनतापाशं संदिद्य**
**भारतवर्षं स्वाधीनताम् अलम्भयत्। अहिंसाश्रयेणैव**
**महर्षिदयानन्दों विषप्रदं ब्राह्मणं जगन्नयाम् अमु´चत्।**
**अहिंसाया गौरवम् अवलोक्यैव मनुना प्रतिपाद्यते**
**यत् स्वसुखसाधनाय न प्राणिवधम् आचरेत्।**
**"योहिंसकानि भूतानि हिनस्त्यात्म सुखेच्छया।**
**स जीवंश्च मृतश्चैव न क्वचित् सुखमेधते।।"**
**अहिंसयैव स्वोन्नतिः परोन्नतिः राष्ट्रहिंत विश्वहितं**
**च संभाव्यते। अतएवोच्यते - 'अहिंसा परमो धर्मः।"**

**12.धर्मस्य भावना -**

**महाभारत कृता वेदव्यासेन जगद्धारक तत्त्वानां**
**'धर्मः' इति समाख्या वयधायि।**
**"धारणाद् धर्म इत्याहुर्धमो धारयते प्रजाः।**
**यः स्याद् धारण संयुक्तः स धर्म इति निश्चयः।।"**
**धर्मेण हीनाः पशुभिः समानाः। धर्म एव जीवनस्य**
**सारः। धर्मो रक्षति रक्षितः - मनुना धर्मलक्षणं**
**निर्दिशते यद् -**
**" वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः,**
**एत´चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्।।"**
**सत्यं धर्मस्य मूलम्। सत्यात् ऋते न धर्मस्य**

प्रतिष्ठा। सत्याश्रयैव धर्मवृत्तिः।
जगति धर्म एव पारस्परिक - विश्वास - संधानात्
प्रजानां धारकः। धर्मस्य विश्वजनीनत्वं, सार्वलौकिकत्वं
च विश्वहित सम्पादनादेव प्रवर्तते। धर्म एव शिक्षयति -
"उदारचरितानां तु वसुधैव कुटुम्बकम्" सत्यं,
दया परोपकारादयो धर्मस्य मूलतत्वानि गण्यन्ते।
अतः पर दुःखनिवारणं करूणा द्रवत्वं च धर्मे संगृहयते।
अतएव प्रोचयते - "न च धर्मो दयापरः।"
अस्माकम् जीवने धर्मस्य सर्वदा सर्वथा चानिवार्यत्वं
वर्तते। अस्माकं जीवने धर्मः जीवन रक्षकः,
सुखशान्ति संधायकः, सत्कर्मप्रेरकः च अस्ति।

साम्प्रतं लोके धर्मस्य द्विविधं रूपम् - कर्मकाण्डमूलकम्,
आचारमूलकं च। न हि धर्मो विद्वेषं शिक्षयति। ये
साम्प्रतम् विविधाः सम्प्रदायाः ते - भिन्न रूचिर्हि लोकः"
"मुण्डे मुण्डे मतिर्भिन्ना" इति प्रवादमाश्रित्यैव प्रवर्तन्ते।
जगति धर्म एव सर्वोत्कृष्टं मित्रम्। सम्पदि विपदि
सुखे दुःखे चाजस्त्रं साहाय्याचरणेन धर्मः परमः सुहत्।
न केवलं जीवने परत्रापि सुखसाधनेन धर्मस्य परम
बन्धुत्वं परममित्रत्वं च व्यादिश्यते। उच्यते च -

"एक एव सुहद् धर्मो निधनेप्यनुयाति यः।
शरीरेण समं नाशं सर्वमन्यतु गच्छति।।'

"आचाराद् विरूयुतो विप्रो न वेदफलमश्नुते।
आचारेण तु संयुक्तः सम्पूर्ण फलभाग् भवेत्।" (मनुस्मृति)

**13.** देशप्रेमस्य भावना -

देशप्रेमस्य विषये भारतस्य महिमा अद्वितीया।
अनेका वीराः शूराश्च भारतभूमिः रक्षाय निजप्राणान अपि
परित्यक्ता। प्राचीनकालादेव देशभक्तिर्मानवजीवने ओता प्रोता च।
ऋग्वेदे ' 'अहं राष्ट्री सङ्मनी वसूनाम।
अर्थर्ववेदे - माता भूमिः पुत्रो अहं पृथिव्याः।
रामायण - महाभारत - पुराणादिषु स्वदेश - गौरवं
देशभक्तिश्च बहुधा कीर्त्यते। स्वदेशभक्ति भावनयैव
प्रेरिताः शतशो महात्मकानः शूरा वीराश्च सर्वस्वं विहायपि
देशरक्षणं व्यदधुः।
देशभक्तियेव देशो उन्नतिभावना, समाजसुधार भावना, राष्ट्रश्री
वृद्धिकरणम् शत्रून्मूलन - पुरः सरं देशस्य सर्वविध
सुदृढीकरणं प्रवर्तते।

"न यत्र देशोद्धृति कामनांस्तेऽस्ते, न मातृभूमेर्हित चिन्तनं च।
न राष्ट्ररक्षा बलिदान भावः, श्मशानतुल्यं नरजीवनं तत्।।
देशभक्ति र्मानवानां सर्वोत्कृष्टं कर्तव्यम्। यत्र न
संचरति न प्रवहति देशभक्तिधारा। तत्जीवनं
शुष्कसरिदेव। देशप्रेमस्य भावना सा शक्तिया्र
मातृभूमि - हिताय सर्वस्वार्पणं प्रति प्रेरयति।
तथैव प्रेरणाया महाराणा प्रताप, शिवाजी, महात्मा - गान्धि,
सुभाषचन्द्रबोस, जवाहरलाल नेहरू, लाला लाजपतराय -
बालगंगाधर तिलक, रानी लक्ष्मीबाई, स्वामी दयानन्द,
सरदारपटेल
प्रभृतयः स्वदेहमोहं परित्यज्य मातृभूमि रक्षार्थ स्वोत्सर्गं
चक्रुः। स्वदेशभिमानस्य भाव, स्वदेशस्य रक्षा - संकल्पः,
परोपकारस्य भावना प्रत्येक भारतीयानां मनसि विद्यमानः
अस्ति। प्रत्येक भारतीयाणां कर्तव्यमस्ति यत्
पुत्ररूपेण मातुः रक्षणम्। कथ्यते अपि
"जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।"

धन्याभारतभूः-

"गायन्ति देवाः किल गीतकानि, धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते, भवन्ति भूयः पुरूषाः सुरत्वात्।।
(विष्णु.)

एतस्य गुणगौरवोत्कृष्टत्वं प्रेक्ष्यैव मनुनोद्घोष्यते -
"एतद् देश प्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षरेन् पृथिव्यां सर्वमानवाः।। (मनुस्मृति)
अतएव भारतीया संस्कृतिः प्राचीनतमा श्रेष्ठा च।
"सा प्रथमा संस्कृर्तिर्विश्ववारा।" (यजुर्वेद)
भारतस्य समृद्धिम दृष्टा पाश्चात्यसभ्यता
भारतं 'सुवर्णपक्षी' इति प्रशास्यते स्म। अगस्त्य, -
बुद्ध - अशोक प्रभृतिभिर्विदेशेषु भारतीयं गौरवम्,
भारतीया संस्कृतिः, बैदिकधर्मः, भारतीया विचाराश्च
प्रचारिताः। अतएव साधूच्यते।
"धन्या भारतभूः प्रकामवसुधा धन्या च तत् संस्कृतिः।"

**14.** गायत्री, गौ, गीता गंगाशश्च महत्त्व :-

भारतीय संस्कृते गायत्री मंत्र गौ, गीता गंगायाश्च महत्वपूर्ण स्थानमस्ति।
गायत्री भारतीय संस्कृते अनादि मंत्रः अस्ति।
गायत्री मंत्रः आकाशवाण्या सृष्टिकर्त्ता ब्रह्म् अप्राप्नोत्।
गायत्री मंत्रस्य साधना तपेनैव सृष्टि निर्माणस्य शक्तिर प्राप्त
गायत्रीम वेदमाता अपि कथ्यते। गीतायाम् भगवान श्री
कृष्ण स्वयंमेव अकथयत् -

"गायत्री छन्दसामहम्" अर्थात् गायत्री मंत्र में मैं स्वयं ही हूं। गायत्री सर्वश्रेष्ठ भारतीय मंत्रमस्ति। अस्माकं भारतदेशे गायत्रीम् भूलोकस्य कामधेनू अपि कथ्यते यतः इदम् मन्त्रः सर्वासां कामानाम् पूर्णम् करोति। गायत्री मन्त्रस्य उपासनाया अन्तः करणः निर्मलः पात्रश्च भवति। आध्यात्मिक उन्नति भवति।

**15.** गौ- अस्माकं भारत देशे गौ माता रूपेण पूज्यते। पुराणेषु कामधेनुमपि वर्णनं प्राप्यते। पुरातन समये विवाहकाले गौ दानस्य परम्परा आसीत्।

"माता रूद्राणां दुहिता वसूना स्वसोदित्याममृतस्य नाभिः।
प्रनु वोचं चिकितेषु जनाय मा गामनागामदितिं वधिष्ट ।।
अर्थात - गाय रूद्रों की माता, वसुओं की पुत्री अदिति पुत्रों की बहिन और धृत रूप अमृत का खजाना है। प्रत्येक विचारशील को चाहिए कि निरपराध एवं अवध्य गौ का वध न करे।

भारत सदृशः कृषिः प्रधान देशस्य कृते गौमाता, गौरक्षणश्च धर्मःअस्ति।

16. गीता - गीता अस्माकम् हिन्दूधर्मस्य महान पवित्रश्च ग्रन्थः अस्ति। कस्य न विदितं भगवद्गीताया गुणगौरवम्। भगवान श्री कृष्णः स्वयं अकथयत् यत् -
"गीता में हृदयम् पार्थः" अर्थात् गीता मेरा हृदय है।

आत्मनः अवध्यत्वं चोपदिशता प्रोच्यते -

**"नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः**
**न चैनं क्लेदयन्त्यापो न शोषयति मारूतः।**

**अनासक्तभावेनैव कार्यकरणं गीतायाः परमोपदेशः**

**"कर्मण्येवाधिकास्ते मा फलेषु कदाचन,**
**मा कर्मफलहेतुर्भूर्मा ते सङ्गोअस्त्वकर्मणि।**

अर्थात् हमें अनासक्त भावना से कर्म करना चाहिए
क्योंकि तुम्हारा केवल कर्म करने में अधिकार है
फल की इच्छा में कभी नहीं।

**मृत्युना शरीरनाशों न त्वात्मविनाशः, अन्यजन्मधारणं जीर्ण-वस्त्रपरिवर्तनेन नववस्य धारणमिव विज्ञेयम्। तद्यथा -**

**"वासांसि जीर्णानि यथा विहाय, नवानि गृहणाति नरोपराणि।**
**तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही।।"**

यदि केवल गीतैका एव अधीयते, विविच्यते , चिन्त्यते
लौकिक जीवने व्यवहियते च तर्हि मानवाजीवनं सर्वथा
सुख-शान्ति समन्वितं सदुदर्क च भविष्यति।

अतः साधूच्यते -

**"गीता सुगीता कर्तव्या, किमन्यैः शास्त्रिविस्तरैः।**
**या स्वयं पदम् नाभस्य मुख पद्माद् विनिःसृता।।**

**17.** गंगा नदी अस्मांक पवित्र, परमपूज्या च नदी। गंगा नदी सर्वासु नदीषु श्रेष्ठा वर्तते। गंगानदी 'सुरनदी' अपि कथ्यते। सुराणां - देवानां नदी सा सुरनदी अस्याः महिमा देवैः अपि मन्यते। भागीरथी, जाहन्वी, मन्दाकिनी इत्यादिभिः नामभिः अपि सा कथ्यते। भागीरथेन राजा सगरपुत्राणाम् उद्धाराय गंगा पृथ्वीतले आनीता तस्मात् कालात् सा - भागीरथी' इति नाम्ना विख्याता। प्रतिवर्षं सहस्त्रं जनाः गंगास्नानं कर्तु हरिद्वारा गच्छन्ति। गंगा नदी भारतीयानां जननीव अस्ति। गंगा स्नाने पापात् मुक्तिर्भवति इति हिन्दुनाम् अटलः विश्वासः। अस्या जलं पवित्रं, निर्मल निर्दोषं च अस्ति। गंगानदी न केवलं भारतीयैः पूजनीया अपितु पाश्चात्यैः अपि अस्याः प्रशंसा कृता यतः गंगाजलस्य वैज्ञानिकैः परीक्षा कृता तज्जलमतीव शुद्धं, निर्विकारम् इति सिद्धम्। गंगोच्चारणेणापित पापक्षालनं भवति इति मन्यते। अतः उक्तम् - "गंगा गंगोति यो बूरयात् योजनानां शतैरपि मुच्यते सर्व पापेभ्यों विष्णुलोकं स गच्छति।"

**18. भारतीय भोजन -**

भारतीय संस्कृति अयं स्वीकरोति यत् भोजनः पूर्ण सात्विकः शुद्धश्च भवेत्।

भोजनस्य शुद्धिरेव मानवस्य अन्तरात्मा शुद्धि भवति।

"अन्नमय हि सौम्य मनः"

वयं अन्नं देवतास्वरूपम् मत्वा गृहयन्ते।

अन्न ब्रह्म् अस्ति, रस विष्णु अस्ति, ग्रहणकर्ता महेश्वरअस्ति।

भोजन केवल क्षुधानिनिवारणस्य साधनमस्ति न स्वादस्य कृते,
एकः हिन्दू भोजनं सर्वदा ईश्वरीय चिन्तनम्
कृत्वा एव ग्रहणं करोति।

"तेजोसि सहोसि बलमासि भ्राजो बलमासि भ्राजोसि देवनां
धामनामसि
विश्वायुः। (वेद)

अर्थात - **हे अन्न। तुम वीर्य हो, तुम बल हो, तुम दीप्ति हो**
**तुम चराचर विश्वरूप हो, तुम ही विश्व के जीवन हे।**

**"रमतां पुण्या लक्ष्मीर्याः पापोस्ता अनीनशम्।"**

पुण्य से कमाया हुआ धन नही मनुष्य को सुख-समृद्वि देता है। जो पापयुक्त धन है उसको मैं नाश करने वाला बनूँ।

**19. सादा जीवन उच्च विचार :-**

अस्मांक संस्कृते मनस्य स्वच्छताया अति महत्वः अस्ति। श्रुतीनाम् अलिखत् यत् आनन्देनैव प्राणिनां जन्मः भवति।

**"आनन्दादेव खल्विमानि भूतानि जायते।**
**आनन्देनजातानिजीवन्ति आनन्दभिप्रमन्त्यभिसंविशन्ति।"**

अर्थात् आनन्द से ही सारे प्राणी आनन्दाभिप्रमन्त्यभिंसविशन्ति।"
तत्व से ही वे जीवित रहते हैं आनन्द की
ओर ही दौड़ते है और अन्त में आनन्द में ही समा जाते है।

**मनस्य हर्षेण चितस्य चाञ्चल्यम् जाता बुद्विश्च**
**तीव्रा तीक्ष्णाश्च भवति।**
**प्रसन्न चेतसो हृशु बुद्विपर्यवतिष्ठते-** (गीता)
**प्रसन्नता मावस्य भाग्यस्य एकः विशेष रचना अस्ति।**
**यः सर्वेसु सम्मानः अस्ति। भारतीय संस्कृति कथयति -**

**"भवोद्विग्नमना चैव हृदद्वेगं परित्यज।**
**कुरू सर्वास्ववस्थासु शान्त सन्तुलितं मनः।**

अर्थात् 'संसार के मनुष्यो! मानसिक उत्तेजनाओं को छोड़ दो और सभी अवस्थाओं में मन को शान्त और संतुलित रखो।

**20. भारतीय पर्व :-**

भारतीय संस्कृते पर्वाणामपि महत्त्वमस्ति। होलिका पर्वः दीपावली पर्वः दूर्गापूजाश्च इत्यादि पर्वा विशेष उत्साहेन मन्यन्ते। होलिकोत्सव सर्वजनानां कृते प्रियः उत्सवः अस्ति। पुरा हिरण्यकशिपुः नाम राजा अभवत् तस्य पुत्र प्रहलादः ईश्वरभक्तः अभवत्। हिरण्यकशिपुः स्वपुत्रं मारयितुम् अयतत् परन्तु प्रहलादः ईश्वर प्रसादेन सुरक्षितः आसीत्। हिरण्यकशिपुः स्वभगिनीं होलिकां प्रहलादाश्च वधस्यकृते न्ययोजयत् । अग्नौ होलिका तु भस्मसात् अभवत् परं प्रहलादः सुरक्षित आसीत्। अन्ते भगवान नृसिंहः हिरण्यकशिपुम् अमारयत्। होलिका दहनमुदिश्य होलिकोत्सवः प्रारभत। होलिका उत्सवः फाल्गुनमासस्य पूर्णिमायां मन्यते। होलिकात्सवे जनाः परस्परं रंगरि´जतम जलं प्रक्षिपन्ति। जनाः नृत्यन्ति गायन्ति च। इदं पर्व मानवानाम् कृते अद्वितीयम् उपहारमस्ति।

दीपावलि : अस्मांक भारतवर्षे दीपावलिः हिन्दुनां पवित्रं पर्वमस्ति। इदं कथ्यते यत् अस्मिन् एव दिने श्री रामः रावणादि राक्षसान् निहत्य सीतया लक्ष्मणेन च सह चतुर्दशवर्षाणां वनवांस समाप्य अयोध्यां प्रत्यागच्छन्। तदा अयोध्यावासिनः प्रसन्नों भूत्वा स्वगृहेषु राजमार्गेषु च दीपकान् प्रज्वालयन्। जनश्रुत्यानुसारेण अस्मिन् एव दिने समुद्रमंथने लक्ष्मी प्रकटिता अभवत्।

दीपावलिः प्रतिवर्षे कार्तिक मासस्य अमावस्यायां तिथौ मन्यते। जनाः स्वगृहानि स्वच्छानि कुर्वन्ति। जना। मालाभिः विद्युत्दीपैः, मृतिका-दीपैः च गृहाणि, मन्दिराणि राजमार्गाणि, आपणानि च अंलकृतानि कुर्वन्ति। जनाः रात्रौ लक्ष्मी गणेशस्य च पूजनं कुर्वन्ति, मिष्ठानानि च खादन्ति। बालकाः स्फोटकानि स्फोटयन्ति प्रसन्नाः च भवन्ति। दीपावलिः पावनतायाः उल्लासस्य च प्रतीकमस्ति यथा दीपकः अन्धकार नाशयति तथैव वयमपि अज्ञानस्य भेदभावस्य घृणायाः च अन्धकारं नाश्याम। अयं अस्य पर्वस्य संदेशः अस्ति।

दुर्गापूजा :- अश्विन शुक्लपक्षे प्रतिवर्ष दुर्गा पूजयन्ति भारतवासिनः। विशेषेण भारतदेशस्य पूर्वस्यां दक्षिणस्यां दिशि बंग, असम,

अरूणाचल, मणिपुर त्रिपुरा, मेघालयं, मिजोरम आदि राज्येषु अयं महोत्सवः उत्साहेन प्रवर्तते। देवासुर संग्राम महिषासुरेण भंयकरं युदध्म् प्रवुत्तम। तस्मिन् विजयार्थे सर्वे देवाः मिलित्वा संयुक्ता शक्तिं निर्माय अयुध्यन्त। अतः इयं पूजा शक्ति पूजापि कथ्यते।

**दुर्गायै दुर्गापारायै सारायै सर्वकारिण्यै**
**ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः।**

**21. भारतीय संस्कृते तीर्थानां महत्त्वम् -**

भारतीय जीवनशैल्याम् तीर्थाना - मपि महत्त्वम्। भारतीय संस्कृते तीर्थ शब्दस्य अर्थः अति व्यापकः गहनश्च अस्ति। तीर्थ शब्दस्य प्रयोगः आत्मिक विकासाश्रे आध्यात्मिक उन्नतिर्थे अपि कृतः। तीर्थः पवित्रताया घोतकः अस्ति। तीर्थेषु ज्ञानप्राप्ति भगवत् प्राप्तिश्च भवति। पादपः पद्मपुराणस्य पातालखण्डे लिखितमस्ति।

**"स हरिर्ज्ञायते साधुसंगमात् पापवर्जितात्।**
**येषां कृपातः पुरूषा भवन्त्य सुख वर्जिता।।**
**ते साधवः शान्तरागाः कामलोभविवर्जिताः।**
**बुरवन्ति य महाराज तत् संसारनिवर्तकम्।।**
**तीर्थेषु लभ्यते साधु रामचन्द्रपरायणः।**
**यद् दर्शनं नृणां पापराशि दाहाशुशुक्षणिः।**
**तस्मात् तीर्थेषु गन्तव्यं नरैः संसार भीरूभिः,**
**पुण्योदकेषु सततं साधुश्रेणि राजिषु।।"**

अर्थात्- तीर्थो में उन भगवान का, उनके स्वरूप, तत्त्व गुण लीला, नाम आदि का ज्ञान होता हैं हम तीर्थो में निवास करने वाले पाप रहित साधु सत्संग में सांसारिक दुःख से छूट जाते है।

अस्माकम् भारत देशे बद्रीनाथ, रामेश्वर, द्वारिकापुरी, जनन्नाथपुरी इत्यादि तीर्थस्थानानि सन्ति। प्रत्येक हिन्दू स्वीकरोति यत् तीर्थ स्थलस्य यात्रा करणेन मनसः समस्त विकाराः दूरं भवन्ति मनः शान्तः निर्मलः पवित्रश्च जाता। गंगा जले स्नाने समस्त पापा विनश्यन्ति। कथ्यते अपि -

**"न जलाप्लुत देहस्य स्नानमित्यभिधीप।**
**स स्नातो योदमस्नातः शुचिः शुद्धमनोबलः।।"**

अर्थात्- गंगाजल में मात्र शरीर को डुबो लेना स्नान नहीं कहलाता। जिसने दम रूपी तीर्थ में स्नान किया है, मन इंद्रियों को वश में कर रखा है उसी ने वास्तव में स्नान किया है। जिसने मन के मैल को धो डाला है,ख् वही शुद्व है।

अस्माकं यानि धार्मिक कृत्यानि, अनुष्ठानि वा सन्ति

तानि स्नानं बिना अपूर्णमेव। परम् आन्तरिक पवित्रता अत्ति आवश्यकः अस्ति अन्यथा सर्वेषु तीर्थेषु स्नानं कृत्योपि प्राणी पापी मलिनश्चेव तिष्ठाति। कथ्यतेअपि -

**"न शरीर तू मले त्यक्ते त्यागन्नरों भवति निर्मलः**
**मानसे तु मले त्यक्ते भवत्यन्त सुनिर्मलः।।**

अर्थात् केवल शरीर के मैल को उतार देने से ही मनुष्य निर्मल नहीं हो जाता। मानसिक मल का परित्याग करने पर ही भीतर से अत्यन्त निर्मल होता है।

**"सत्यं तीर्थ, क्षमा तीर्थ तीर्थमिन्द्रियनिग्रहः।**
**सर्वभूतदया तीर्थ तीर्थमार्जव मेव च।।"**

सत्य तीर्थ है क्षमा करना तीर्थ के समान फलदायक है। इंद्रियों पर नियंत्रण करना तीर्थ के समान उपकारी हे। सब प्राणियों पर दया करना तीर्थ के समान पुण्य देने वला है और सरल जीवन भी तीर्थ ही समझना चाहिए।

**- दान तीर्थ दमस्तीर्थ संतोषस्तीर्थमुच्यते।**
**ब्रह्मचर्य परं तीर्थ तीर्थ च प्रियवादिता।।**
**दान तीर्थ है मन का संयम तीर्थ है संतोष भी**
**तीर्थ कहा जाता है। ब्रह्चर्य परम तीर्थ है और**
**प्रियवचन बोलना भी तीर्थ समझना चाहिए।**

**- "ज्ञानं तीर्थ धृतिस्तीर्थ तपस्तीर्थमुदाहृतम्।**
**तीर्थानामपि तत्तीर्थ विशुद्विर्मनसः परा।।"**

ज्ञान तीर्थ है, धैर्य तीर्थ है, तप को भी तीर्थ कहा जाता है। तीर्थो में सबसे श्रेष्ठ है अन्तः करण की अत्यन्त विशुद्वि।"

अतएव कथयितुम शक्यते यत् भारतीय जीवनशैली वैश्विक आकर्षणस्य केन्द्रबिन्दुरस्ति। अस्माकम् संस्कृते सभ्यतायाश्च प्रभाव पाश्चात्य देशेषुपि अस्ति। मातृदेवो भवः, पितृदेवो भवः, आचार्य देवा भवः, अतिथिदेवो भवः एतादृशी भावना अस्माकमेव संस्कृतेः अवलोक्यते। याः एव भावना सम्पूर्ण सृष्टेः आधारशिला। अतएव भारतं --विश्वगुरूः" इति मन्यते। धन्यः भारतदेशः यत्र जनाः भिन्नाः सन्तोअपि परस्परं मिलित्वा सहयोगेन निवसन्ति। यः देशः युद्वरतोअपि वितरित विश्वशान्तिः संदेशः। देशः शिक्षयति सर्वान् आत्मनुशासन्। अस्माकं देशः आर्याव्रतः, भारतवर्षः, हिन्दुस्तानम् इति त्रिभिः नामभिः प्रसिद्वः अस्ति। भारतदेशस्य विद्या कला च सर्वत्र प्रसिद्वंगताः । भारत देशस्य संस्कृति (जीवनशैली) अधुनापि सर्वेषां कृते अनुकरणीया अस्ति। अतः वयं स्वदेशस्य गौरवं रक्षेम्। भारतीयः संस्कृते उदात्तत्वदर्शनं न केवलं संस्कृत साहित्ये अपितु ग्रामे ग्रामे नगरे नगरे लोकजीवने च भवति। अहिंसा सत्यास्तेया- दिधर्मास्तादृशा एव समन्वयो हि भारतीय संस्कृते मूलतत्वम् अस्मादेव कारणादत्र बहव्यो वैदेशिक्यः संस्कृतयः समायाताः परन्तु ताः सर्वा एव भारतस्य संस्कृति विलीनाः।

भारतस्य विविधेषु प्रदेशेषु विविधा जनाः विविधवेषधारिणों विविध भाषाभाषिणोपि विविधदेवान् पूजयन्तोपि हृदये समाना एवं सर्वएव एकमेव परमेश्वरं मन्यते, सर्वेषु तीर्थेषु समानादरों दृश्यते, गंगा का सर्वोषामेव पूज्यतमा गां च सर्व एव मातरं मन्यते। अस्याः वैशिष्ट्यम् एतदेव यत् अनेकैः वैदेशिकैः एनां नष्टुं प्रयत्न कृतम् किन्तु एषा न नष्टा अपितु अद्यापि अक्षुण्णा एव दृश्यते। मानवतायाः अत्र पूजा भवति।

**भारतवर्ष सांस्कृतिक -** दृष्ट्या धार्मिक दृष्ट्या च विश्वस्य पथ-प्रदर्शकः। अस्माकम् अतीतम् अद्यत्वेपि स्वगौरवं प्रकाशयति। वयमेव भारतीयाः सर्वप्रथमं विश्वस्य चरित्रनिर्मातारः इति मनुरूवाच "एतद्देश- प्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षरेन् पृथिव्यां सर्वमानवः"। अतएव कथयितुम् शक्यते भारतीय जीवनशैली वैश्विक आकर्षणस्य केन्द्रबिन्दुम् अस्ति।

**सन्दर्भ ग्रन्थाः-**

निबन्धशतकम्
भारतीय संस्कृति - एक जीवन दर्शन
इंटरनेट - होली, दीपावलिः,
दुर्गापूजा विषये सामग्री प्राप्ता।